सेवनं, ज्ञातोपपादितेष्वेव यानादिष्वारोहः, [illegible] करणम्, अधार्मिकादेर्दूरीकरणं, [illegible] बद्धादेर्नाव उपेक्षणं, बहिरुद्यानेऽप्रमादेन [illegible] व्यां स्वयं लघुकोष्ठस्य गमनं, मातुरन्तिकेऽपि [illegible] प्रवा-तादिषु गमनप्रतिषेधः, निर्गमे च प्रवेशे च [illegible] घेऽवगाहननिषेधः, अन्तःपुर एव कुब्जादिभिः [illegible] राजोपस्थानम्, आभ्यन्तरजनस्य कुब्जादिभिः [illegible] भ्यन्तरजनस्य निर्गमप्रवेशौ, कल्यमेवानु[illegible] एव देव्या दर्शनं, देवीगृहगमनप्रतिषेधः, [illegible] द्वयलाभः, आप्तरक्षितस्य पार्श्वे [illegible] राज्ये प्रजानां सुखं विपर्यये दुःखं च, नीत्या [illegible]

## १२. मण्डलयोनिप्रकरणम्. [illegible]

राज्ञः सम्पूर्णमण्डलता, कौटिल्यादयो विजिगीषुगुणाः, [illegible] स्यापि राज्ञः प्रसादेनावश्यं योगः, विजिगीषुगुणयुक्तस्य [illegible] दिगुणयुक्तस्य सुखोच्छेद्यता, विजिगीषोः पुरोवर्तिनां [illegible] त्वं, पृष्ठतो वर्तमानानां चतुर्णां क्रमेण पार्ष्णिग्राहादित्वं, [illegible] षुमण्डलता, अरिविजिगीष्वोर्भूम्यनन्तरस्य मध्यमता, [illegible] स्योदासीनता, अरिविजिगीषुमध्यमोदासीनरूपा [illegible] लमिति मयमतं, तदेव पार्ष्णिग्राहमित्रसहितं [illegible] मध्यमोदासीनसहितं विजिगीषुमण्डलं द्वादशराजकमित्युशनसो मतम्, [illegible] द्वादश पृथगरिमित्रसहिताः षट्त्रिंशत्कमिति [illegible] कसहिताः द्विसप्ततिर्मण्डलमिति मानवमतं, द्वादशैव पृथगरि[illegible] रिणोभयसुहृदा च युक्ता अष्टादशकमिति गुरुमतम्, अष्टादशैव [illegible] श्चकसहिता अष्टोत्तरशतमिति कवीनां मतम्, अष्टादशैव पृथगरि[illegible] ष्पञ्चाशत्कमिति विशालाक्षमतं, चतुष्पञ्चाशदेव [illegible] शत्याधिकं त्रिशतमिति मतान्तरम्, अरिविजिगीष्वो[illegible] दशकं मण्डलमिति कैपाञ्चिन्मतम्, अरिविजिगीषुम[illegible]

DR.RUPNATHJI( DR.RUPAK NATH )

मिथ्याभियोगस्य तच्छ्रवणस्य च निषेधः, मित्रभेदकारिणां [illegible] कादीनां वचसां ज्ञानं, सुहृदां प्रकाश[illegible], गुरुषु कार्येषु नीचानामपि दोषान् मनोऽपि [illegible] नीचानामपि मित्रीकरणम्, एवं समुद्धर्मिणा [illegible]।

## १४. सन्धिविकल्पप्रकरणम्. [illegible]

बलिना विगृहीतस्य कालयापनेन [illegible] यः—(१) उभयोरैकात्म्यं विना सन्धि[illegible] प्पद्यमानस्योपहारत्वं (२) दारिका[illegible] समानार्थप्रयोजनस्य मैत्रीपूर्वस्य सङ्गतसन्धि[illegible] मयोच्छिन्ने तथाप्यर्थसिद्धि[illegible] क्रियमाण[illegible] त्वादयं प्रतिकरिष्यतीति वा अयोपकरोम्य[illegible] प्रतीकारसन्धिः (७) एकार्थो यात्रामुद्दिश्योभयोर्गमनं [illegible] योः सेनापतिभ्यां मदर्थः साध्य इति क्रियमाण[illegible] मदर्थः साध्य इति क्रियमाणोऽदृष्टपुरुषसन्धिः [illegible] शेन सन्धिरादिष्टः (११) स्वसैन्येन सह स्वयं [illegible] आत्मामिषसन्धिः (१२) आत्मरक्षार्थं सर्वं दत्त्वा क्रियमाण[illegible] सर्वकोशेन कोशांशेन वस्त्रकम्बलादिना वा [illegible] (१४) सारवतीर्भुवो दत्त्वा क्रियमाण उच्छिन्नसन्धिः [illegible] दानेन क्रियमाणः परदूषणः (१६) खण्डखण्डेन फलं [illegible] पनेयः, प्रतीकारः सङ्गतः सन्तान उपहार इति [illegible] न्तरं, सङ्गतवर्जिताः सर्वेऽन्ये उपहारस्यैव [illegible] सन्धिद्वयमिति स्वमतं, बालादीनां विंशतिपुरुषाणा[illegible] वश्यता—(१) बालस्य प्रभुशक्तिविक्रमस्य [illegible] भावः (२,३) वृद्धस्य दीर्घरोगिणश्चोत्साहशक्तिहीनत्वात् [illegible] (४) सर्वज्ञातिबहिष्कृतस्य ज्ञातिभिरेव नाशः (५) [illegible] विनाशः (६) भीरुकजनस्य स्वयं वीरस्यापि स्वजनैर्युद्धे [illegible] (७) लुब्धस्यासंविभागित्वादनुजीविनां युद्ध एवापवृत्तिः (८) लुब्धजनस्य [illegible]-

DR.RUPNATHJI(DR. RUPAK NATH)

घृणा दानभिन्नैर्भेदैर्वा नाशः (९) विरक्तप्रकृतेः प्रकृतिभिर्युद्धे त्यागः (१०) विषयव्यसनिसक्तिमनः परैः सुखेनैवाभियोगः (११) अनेकचित्तमन्त्रस्य द्वेष्यान्मन्त्रिभिः कार्येषु समुपेक्षणम् (१२, १३) देवब्राह्मणनिन्दकस्य दैवोपहतकस्य च विशरणम् (१४) दैवपरस्य चेष्टाया एवाभावः (१५) दुर्भिक्षव्यसनिनः स्वयमेवावसादः (१६) बलव्यसनयुक्तस्य योद्धुमशक्तिः (१७) अदेशस्थस्य स्वल्पेनापि रिपुणा नाशः (१८) बहुरिपुकस्य सर्वथा नाशः (१९) अकालयुक्तसैन्यस्य कालयोगिना नाशः (२०) सत्यधर्मव्यपेतस्य सहितस्यापि नित्यं विनाशो विकिरा, सत्यादीनां समानां सन्धेयता — (१) सत्यस्य सत्यानुपालनेन कदाचिदपि विक्रियाभावः (२) आर्यस्य प्राणात्ययेऽप्यनार्यानाचरणं (३) धार्मिकस्य प्रजानुरागाद् दुरुच्छेद्यता (४) अनार्यस्य शत्रुं निघ्नतः समूलघाते प्रवृत्तिः (५) भ्रातृसङ्घातवतो वेणोरिव निविडत्वादनुच्छेद्यता (६) बलिना समाक्रान्तस्य शरणाभावः (७) अनेकयुद्धविजयिनः सामेन शत्रून्तरवशीकरणं, सन्धानेऽप्यविश्वासः, बन्धनाभियुक्तस्य तद्बन्धनरक्षणाद्दानं, स्वशक्त्युत्साहमवेक्ष्य महत्तरेण विग्रहः, अल्पसैन्यस्य शत्रून् निघ्नतः शत्रुन्तरवशीभावः, जयसन्देहे समेनापि आ सम्प्रवृद्धेः सन्धानम्, अन्ययोनयोरपि कदाचिन्नाशः, आत्मनो व्यसने हीनेनाप्यागनेन सन्धानं, सन्धिमभिलषतो हीनस्य विस्रम्भजनकस्य प्रहारः, वञ्चयता सन्धाय तस्य विस्रम्भकरणं, विस्रम्भे सञ्जाते च तस्य प्रियाभिभाषणपूर्वकं निगूढं कर्तव्यस्यैव करणं, युवराजेन प्रधानपुरुषेण वा सन्धायाभियोक्तुं स्थिरात्मनोऽन्तःप्रकोपजननं, सर्वाभियोक्ता ज्ञातानि तथा ऽज्ञातानि भवेत्सर्वार्थसिद्धिकेष्वाभियोक्तुः प्रधानपुरुषस्य युवराजस्य वा त्यागे, त्यक्ते महामात्रे विश्रम्भस्यापि स्वपक्षेऽविश्वासः, अरण्यात्मान सन्धाय आरम्भवशीकरणं, विषप्रयोगेन वा रसदानेन शत्रोः शासनम्, अभियोक्तुः शत्रोः स्वपक्षाभिरक्षणाय दर्शनं, विग्रहे क्षयादीनामुत्तरस्याभियोगमात्रकृतायाः पीडायाः कश्चित् कालं सहनं, स्वगुणैराधारातः सन्तापनम् ।

## १०. विग्रहविकल्पप्रकरणम् . १४०—१५०.

अमर्षितानां पुंसां परम्परापकारेण विग्रहः, परेण पीड्यमानस्य देशकालबलापेक्षया विग्रहारम्भः, राज्याद्यपहारादयो विंशतिविग्रहयोनयः — (१–४)

DR.RUPNATHJI(DR.RUPAK NATH)

एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥ ५ ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥ ६ ॥

श्यादि, तद् इत्यादिप्रवर्तनात् शोभनमस्येति सुपर्वा । तथा च नन्देन दीयमानं प्रतिग्रहमादित्सुर्ब्राह्मणकर्यान्तरस्कृत इत्यनेन सूचयति । वृत्तान्तो वा पर्वशब्देनो-च्यते । शोभनं चरितमस्येति सुपर्वा । स हि कैलासाङ्ककान्त्या श्रीमान् नन्दोऽभूत् । स चैवंवृत्तोऽपि ननाशेत्यभिचारसामर्थ्यं दर्शयति । नन्द एव पर्वतो नन्दपर्वतः सामन्तादिभिरप्रकम्प्यत्वाद् गोत्रिसमाश्रयत्वाच्च ॥ ४ ॥

**एकाकी** असहायः । मन्त्रशक्त्या ज्ञानबलेन । शक्त्येति प्रभावोत्साहश-क्त्येत्यर्थः । अनेन पुरुषकारसम्पदं दर्शयति । शक्तिधरोपमः गुहोपमः अप्रतिह-तशक्तिमात्रसाधर्म्यात् । इदमुक्तं भवति —— नन्देनतिरस्कारामर्षितस्तस्यसभायां नन्दान् पृथिवीं पृथक् करोमीति कृतप्रतिज्ञो निर्गत्य राजपुरुषैरनुबध्यमानश्चन्द्रगुप्तसंश्रया-दवष्टब्धस्तस्मै नन्दराज्यं प्रतिश्रुत्य नन्दमभिचारवज्रेण व्यापाद्य तद्राज्यमादित्सु-रेकाकी ज्ञानबलेन दण्डकोशसम्पन्नमाटविकं पर्वतकपुत्रसाद्य प्रभावोत्साहशक्तिभ्यां राक्षसाद्यमात्याभिप्रेतमौलवंशं मेदिनीमाक्रम्य चन्द्रगुप्तायोपनीतवानिति पुरुषका-रसम्पत्कथनम् । नृचन्द्रायेति पुरुषविशेषज्ञत्वात् सत्युपकारविषयतां दर्शयति, नन्दभयात् तेन संरक्षितत्वादिति ॥ ५ ॥

**नीतिशास्त्रामृतमुद्धृतवा**नित्यनश्वरकीर्तिसन्दर्शनम् । श्रीमानिति । अ-शक्यसम्पदत्र श्रीः, नन्दमुन्मूल्य तदानीं सर्वतश्चन्द्रगुप्तप्रतिष्ठापितराज्यत्वात् । ए-तस्य कृतकृत्यत्वात् कीर्तिप्रतिष्ठापनमस्योपपन्नम् । शास्त्रार्थज्ञानसम्पद् वा श्रीः शा-स्त्रकरणप्रस्तावात् । विष्णुगुप्तायेति सांस्कारिकी संज्ञा, चाणक्यः कौटिल्य इति द्वे जन्मभूमिगोत्रनिबन्धने । वेधसे इ(ति? व) वेधसे पृथक् शास्त्रप्रणयनादेवम् ॥ ६ ॥

---

१. 'शा' क-ख ग. पाठः. २. 'गमाश्रयावष्टम्भतन' घ. पाठः. ३. 'त्वादिबलो मे' घ. पाठः. ४. 'पल्वा' ग-घ. पाठः. ५. 'स इति पृ' ग. पाठः. ६. 'थे ॥' ग. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

सानुरागो रिपुद्वेषी पीडाकरसहः पृथुः ।
नानादेश्यैः समाकीर्णो धार्मिकः पशुमान् धनी ॥ ५३ ॥

ईदृग् जनपदः शस्तो मूर्खव्यसनिनायकः ।
तं वर्द्धयेत् प्रयत्नेन तस्मात् सर्वं प्रवर्त्तते ॥ ५४ ॥

पृथुसीमं महाख्यातमुच्चप्राकारगोपुरम् ।
समावसेत् पुरं शैलं सरिन्मरुवनाश्रयम् ॥ ५५ ॥

जलवद् धान्यधनवद् दुर्गं कालसहं महत् ।
दुर्गहीनो नरपतिर्वाताभ्रावयवैः समः ॥ ५६ ॥

**सानुरागः** स्वामिप्रियत्वादापत्स्वपि न परत्रगमनमुपैति । रिपुद्वेषी न परेणा-भिसन्धाप्यते । पीडा दण्डः । करः शुल्कादिकम् । पृथुर्विस्तीर्णः । **नानादेश्यैः समाकीर्णः** राज्ञः कोशवृद्धिं स्ववृद्धिं च जनयति । धार्मिकः यथास्वधर्माचारादनु-च्छेद्यः । पशुमान् गोमहिष्यादिसम्पन्नत्वात् कर्षणाद्युपकारमावहति । धनी स्फीतः ॥

**मूर्खव्यसनिनायक** इति । नायको महत्तरः, स मूर्खो व्यसनी च यत्र, स हि यथाज्ञानकारित्वाद् यथेष्टभोग्यो भवति । तस्मात् सर्वं प्रवर्त्तत इति । सर्व-कर्मणां योनित्वाज्जनपदस्येति ॥ ५४ ॥

दुर्गसम्पदमाह पञ्चभिः श्लोकैः — **पृथुसीममित्यादि** । पृथुसीम विस्तीर्णगोपु-रद्वारम् । तत् पुनश्चतुर्विधम् — तत्र शैलं पर्वतदुर्गं, सरिदाश्रयमौदकं, मरुदेशा-श्रयं धान्वनं, वनाश्रयं वार्क्षमिति ॥ ५५ ॥

तत्रापि सन्निचयसाधिक्यमित्याह — **जलवदित्यादि** । एवम्भूतं **परा**भियोगकालं सहत इति कालसहम् । वाताभ्रावयवैः समः निराश्रयस्य शत्र्वा-दिनोच्छेदात् ॥ ५६ ॥

---

१. 'स' क-ग. पाठः. २. 'त्मग' ख-ग. पाठः. ३. 'सं निर्ज(न्छ)देशं भवं च' क-ख-ग-घ. पाठः.

मुक्ताकनकरत्नाढ्यः पितृपैतामहोचितः ।
धर्मार्जितो व्ययसहः कोशः कोशज्ञसम्मतः ॥ ६१ ॥
धर्महेतोस्तथार्थाय भृत्यानां भरणाय च ।
आपदर्थं च संरक्ष्यः कोशः कोशवता सदा ॥ ६२ ॥
पितृपैतामहो वश्यः संहतो दत्तवेतनः ।
विख्यातपौरुषो जन्यः कुशलः कुशलैर्वृतः ॥ ६३ ॥
नानाप्रहरणोपेतो नानायुद्धविशारदः ।
नानायोधसमाकीर्णो नीराजितहयद्विपः ॥ ६४ ॥
प्रवासायासदुःखेषु युद्धेषु च कृतश्रमः ।
अद्वैध्यः क्षत्रियप्रायो दण्डो दण्डविदां मतः ॥ ६५ ॥

**मुक्ताकनकरत्नाढ्यः** तेषां महार्घाणामतिबाहुल्यादक्षयः । पितृपैतामहोचितः पूर्वक्रमागतत्वादकृशोपचयः । धर्मार्जितः शास्त्रोक्तन्यायागादिना, स हि परेषामनाभिपन्नो भवत्यक्षयश्च । व्ययसहः दीर्घव्ययक्षमः । एवंविधो निर्दोषत्वात् कोशज्ञानां सम्मतः ॥ ६१ ॥

तस्य च पञ्च प्रयोजनानि । यदाह — धर्महेतोरित्यादि । अर्थाय अर्थान्तराय । कामोऽप्यत्राभिप्रायः ॥ ६२ ॥

दण्डसम्पदमाह — पितृपैतामहो वश्य इत्यादिना श्लोकत्रयेण । वश्यः यथाज्ञाकरः । संहतः परस्परमभेद्यः । दत्तवेतनः कृतवेतनविभागः । विख्यातपौरुषः अनेकयुद्धविजयित्वात् । जन्यः जानपदः । कुशलः शिल्पेषु । कुशलैर्वृतः शाखा-[illegible] पुरुषादिभिः ॥ ६३ ॥

**नानायुद्धविशारद** इति । नानायुद्धं द्वन्द्वयुद्धादिभिः । नानायोधा निम्नस्थ-लखनकाकाशादिविभागयोधिनः । नीराजितहयद्विपः, ते हि शास्त्रोक्तविधिना नीराजिताः दैवमानुषविघ्नपङ्क्तीर्निवारयन्ति ॥ ६४ ॥

**आयामः** कर्मसु व्यायामः । युद्धे शीतोष्णवर्षादिप्रभवम् । कृतश्रमः न सहसा श्राम्यति । अद्वैध्यः राज्ञः सहवृद्धिक्षयत्वात् । क्षत्रियप्रायः क्षत्रियाणां युद्धयोग्यत्वादितरेषामपि तत्सम्पर्कादुत्साहो भवति ॥ ६५ ॥

---

१. 'चि' इति मूलकोशेषु पाठः. २. 'आतप' ग. पाठः.

## अथ षष्ठः सर्गः ।

### ९. कण्टकशोधनप्रकरणम्

लोके वेदे च कुशलैः कुशलैः परिरक्षितः[1] ।
आत्मानश्चिन्तयेद् राज्यं सबाह्याभ्यन्तरं नृपः ॥ १ ॥
आभ्यन्तरं शरीरं स्वं बाह्यं राष्ट्रमुदाहृतम् ।
अन्योन्याधारसम्बन्धादेकमेवेदमिष्यते ॥ २ ॥
राज्याङ्गानां तु सर्वेषां राष्ट्राद्भवति सम्भवः ।
तस्मात् सर्वप्रयत्नेन राजा राष्ट्रं समुन्नयेत् ॥ ३ ॥
लोकानुग्रहमन्विच्छञ्छरीरमनुपालयेत् ।
राज्ञः संरक्षणं धर्मः शरीरं धर्मसाधनम् ॥ ४ ॥

एवमनन्तरैः परिरक्षितैरनुशीलितैः परिरक्षितः सबाह्याभ्यन्तरं राष्ट्रं निरूपयेत्, यथा स्वपरराष्ट्रेष्वेवं इति तदुपघातप्रतिविधानाय सर्गद्वयमुच्यते । तदेवाद्यश्लोकेन दर्शयति — लोके वेदे च कुशलैरिति । दृष्टव्यवहारैः दृष्टशास्त्रैश्चेत्यर्थः । न हि पापोऽप्यसावपि न संकीर्णो भवति । कुशलैरनुशीलितैः ॥ १ ॥

शरीरं स्वामिनि । स्वामिप्रकृतिरित्यर्थः । बाह्यं राष्ट्रमुदाहृतम् अमात्यादिकम् । राज्यशब्दः समुदायवृत्तिरवयवेष्वपि वर्तते देशपादवत् । बाह्याभ्यन्तरभावेन कल्पितमप्येकमेवेदमिष्यते अन्योन्याश्रयाश्रयिभावात् रथवत् ॥ २ ॥

तत्र बाह्यं राष्ट्रं प्रधानं, शेषाणां तत उत्पत्तेरित्याह — **राज्याङ्गानामिति** । उक्तञ्च "कोशो दण्डः कुप्यं विष्टिर्वाहनं निचयाश्च जनपदादुत्तिष्ठन्ते तेषामभावो जनपदाभावे स्वाम्यमात्ययोश्चानन्तरः" (कौटि. अर्थ. ८-१-१२७) इति । तस्मात् सर्वप्रयत्नेन राष्ट्रमेव प्रसाधयेत् । कण्टकोद्धरणेन ॥ ३ ॥

स्वशरीरसंरक्षणं चास्य लोकसंरक्षणार्थमेवेत्याह — **लोकानुग्रहमित्यादि** ।

१. 'बालैः' क. पाठः. २. 'मुच्यते' ख-ग. पाठः.

प्रकाशापक्षग्रहणं न कुर्यात् सुहृदां स्वयम् ।
अन्योन्यमत्सरं चैषां स्वयमेवाशु वारयेत् ॥ ८४ ॥
कार्यस्य हि गरीयस्त्वादीशानामपि कालवित् ।
सतोऽपि दोषान् प्रच्छाद्य गुणानप्यसतो वदेत् ॥ ८५ ॥
प्रायो मित्राणि कुर्वीत सर्वावस्थानि भूपतिः ।
बहुमित्रो हि शक्नोति वशे स्थापयितुं रिपून् ॥ ८६ ॥
न तत्र निर्गति भ्राता न [illegible]ऽपि वा जनः ।
दुर्गमामापत्प्रतीकारं गमिष्यत्येव तिष्ठति ॥ ८७ ॥
अभियान् सर्वतो मित्रैर्विजिगीषुरियाद् दृढैः ।
इति मण्डलकृत्यं तत् मण्डलज्ञाः प्रचक्षते ॥ ८८ ॥
मित्रोदासीनरिपव एतन्मात्रं तु मण्डलम् ।
सम्यक् सा[illegible]नवानीति मण्डलशोधनम् ॥ ८९ ॥

प्रकाशपक्षग्रहणं न कुर्यात् अन्यथा [illegible] वैगुण्यं स्यात् । आकाशं तु कर्तव्यम् । [illegible] । अन्योन्यमत्सरं परस्परमस्पर्द्धमसहिष्णुतान् । [illegible] ॥ ८४ ॥

[illegible] । सतः विद्यमानानपि । असतः अविद्यमानानपि ॥ ८५ ॥

ननु [illegible] किमर्थं [illegible] मित्राणि कुर्यादित्याह — प्राय इत्यादि । सर्वावस्थानि सर्वास्ववस्थासु कृतनिष्ठानि ॥ ८६ ॥

सन्निवेशे मित्रलक्षणप्रसङ्गम् ॥ ८७ ॥

अभियान् [illegible] दर्शयति । सर्वतः समन्ततः । दृढैः [illegible] । इति मण्डलकृत्यं [illegible] । तद् यथोक्त विजिगीषोः मण्डलचरितम् ॥ ८८ ॥

तत्र मण्डलं संक्षेपेणाह — मित्रोदासीनरिपव इति । उदासीनस्योपादानं

१. 'सु' ख ग पाठः. २. '[illegible]' क. पाठः. ३. 'कृतैः' ख ग. पाठः. ४. 'हि' मूलकोशेषु पाठः. ५. 'कृत्वा [illegible]' क ख ग. पाठः.

यात्राकालक्रियार्थी वा तत्र चायं विलम्बते ।
काले विक्षिप्यमाणे तु तर्कयेदिति पण्डितः ॥ २१ ॥

कार्यकालव्यपेतं च व्यक्तं ज्ञात्वा विनिष्पतेत् ।
तिष्ठन् वार्ताविशेषार्थी भर्त्रे सर्वं निवेदयेत् ॥ २२ ॥

रिपोः शत्रुपरिच्छेदः सुहृद्बन्धुविभेदनम् ।
दुर्गकोशबलज्ञानं कृत्यपक्षोपसङ्ग्रहः ॥ २३ ॥

राष्ट्राटव्यन्तपालानामात्मसात्करणं तथा ।
युद्धापसारभूज्ञानं दूतकर्मेति कीर्तितम् ॥ २४ ॥

दूतेनैव नरेन्द्रस्तु कुर्यादरि[2]विमर्शनम् ।
स्वपक्षे च विजानीयात् परदूतविचेष्टितम् ॥ २५ ॥

(इति दूतप्रचारो नामाष्टादशं प्रकरणम्)

---

**यात्राकालक्रियार्थी** वेति । यात्राकाले यत् परबलापेक्षया बलसमुत्थान-कर्म ततोऽपेक्षी (नार्थी ?)वा । तत्र च कर्मण्ययं प्रविलम्बमानो न प्रेषयति ॥ २१ ॥

**कार्यकालव्य[3]पेतं** कार्यकालयोरतिक्रमणम् । वार्त्ताविशेषार्थीति । अस्मान-नादृत्यान्यत्रानेन सन्धिविग्रहादिकं प्रस्तुतं, तत्रास्य किं स्थितामिति[4] निश्चयार्थी चेत्, तदा तत्रैव तिष्ठन् तत् यथोक्तं भर्त्रे निवेदयेत् प्रतिविधानार्थम् ॥ २२ ॥

सङ्क्षेपेण दूतव्यापारमाह — **रिपो**रित्यादि । शत्रुपरिच्छेद एतावन्तोऽस्य शत्रव इति । बलं सैन्यम् ॥ २३ ॥

**अटवी** तात्स्थ्यादाटविकाः । युद्धाप[5]सारभूज्ञानमिति हस्त्यश्वरथपदातीना-मेता युद्धयोग्या भूमयः, एषा च बलवताभियुक्तस्य कलत्रस्थानमिति ॥ २४ ॥

यथा दूतामात्येन यथोक्तं विमर्शनं कुर्यात्, तथा किमन्येनाप्यमात्येने-

---

१. 'क्ति' क. पाठः. २. 'जानीयादरिचेष्टितम्' ख.ग. पाठः. ३. 'व्यवायं का' ङ. पाठः.
४ 'ति तन्नि' क. ख. ग. घ. पाठः. ५. 'वसर' च. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

युध्येतानृतसन्त्रासं यथार्हायुधवाहनम् ।
कलत्रगर्भि कोशीतकल्पं संसरक्षमम् ॥ ८० ॥

अनेकराज्यान्तरितमतिक्षिप्तं न युध्यते ।
अन्तर्गतामित्रशल्यमन्तःशल्यं हि न क्षमम् ॥ ८१ ॥

अन्योन्यस्माद् विनिर्भिन्नं भिन्नमार्गं न युध्यते ।
तथैवापसृतं शक्तं नैकराज्यान्तरीकृतम् ॥ ८२ ॥

अवमुक्तमपक्रान्तमुख्यं तन्न क्षमं युधि ।
पितृपैतामहं मौलं तत्र युद्धे सान्त्वितं क्षमम् ॥ ८३ ॥

---

**यथा(शक्त्या?र्हा)युधवाहनं** यथाकालेनायुधवाहनेर्युक्तम् । **कलत्रगर्भि** चेति । अयुद्धयोग्यः स्त्रीकोशादिवर्गः कलत्रं, तेनान्तःप्रविष्टेन युक्तम् । समरं युद्धम् ॥ ८० ॥

**अनेकराज्यान्तरितं** शत्रुमित्रादिराज्यैर्व्यवहितम् । अमित्र एव श-ल्यम् ॥ ८१ ॥

**अन्योन्यस्माद् विनिर्भिन्नं** परस्परभयान्न युध्येत । नैकराज्यान्तरीकृत-मिति शत्रुराज्येनैकान्तरितं न युध्यते । एतच्चातिक्षिप्तमात्रेषु व्यसनम् ॥ ८२ ॥

**अपक्रान्तमुख्यमिति** । शौर्यादियुक्ता मुख्याः, तेऽपसृताः तस्मात् तद् बलमपक्रान्तमुख्यम् । तन्न क्षमं युधि । मुख्येषु हि युद्धं, न क्षुद्रेषु । सान्त्वि-तं क्षममिति । यत्र मौलं कुपितं, तत्र सान्त्वितं युधि क्षममिति यो-ज्यम् ॥ ८३ ॥

---

१. 'सङ्गर' क. पाठः. २. 'क्षीणं न' ख.ग. पाठः. ३. 'न सन्ताप' ग.घ. पाठः. ४. 'कोशानि' क. पाठः. ५. 'तु' ख.ग. पाठः. ६. 'परिमुक्तमामिका' क. पाठः. ७. 'बलम्' पाठः. ८. 'ज्यान्तरितम्' क.ख. पाठः. ९. 'न प्रभु' ग.घ. पाठः. १०. 'यु तत्र क्षतम् ।' क.ख.ग.घ. पाठः. ११. 'न तत्र यु' क.ख.ग.घ. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

तस्माद् यतो भूरिजलस्तु पन्था
यतोऽन्नपानोपचयोऽविशङ्कः ।
ततो हि यायाज्जनयन् प्रतापं
शनैःशनैर्विश्रमयन् बलानि ॥ १३ ॥

अभ्युन्नतानामणुरप्युदारं
पश्चात्प्रकोपं जनयेदरीणाम् ।
तं चाप्रमत्तः प्रसमीक्ष्य यत्ना-
न्न नाशयेद् दृष्टमदृष्टहेतोः ॥ १४ ॥

पश्चात्प्रकोपः पुरतः फलं च
पश्चात्प्रकोपस्तु तयोर्गरीयान् ।
रन्ध्रं हि तद् विप्रकृता महत्त्वं
नयन्ति तस्मात् प्रविधाय यायात् ॥ १५ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

रिजल इति । यत्र देशे ग्रीष्मे प्रभूतजलो मार्गः । पानं जलाद्-सामन्ताटविकादिप्रतिभयाभावात् । तत इति तेन प्रदेशेन । ाविलोपादिना विश्रमयन् बलानीति ॥ १३ ॥

इत्यस्य प्रदर्शनार्थमाह — अभ्युन्नतानामित्यादि । अभ्यु-ष्णां पश्चात्कोपं जनयेत् । अणुरपि अरीणां मध्ये स्वल्पोऽपि ान्तम् । तं चेति प्रकोपम् । अदृष्टहेतोः यानसाध्यस्यार्थस्य

पोऽल्पः । पुरतः फलं च महत् । रन्ध्रं हि तदिति । । विप्रकृताः शत्रवो महत्त्वं नयन्ति. तस्मात् प्रविधाय

'स्वं च' क. पाठः. ३. 'श्च' क. पाठः. ४. 'त' ङ.च पाठः.

* २१ निमित्तज्ञानप्रकरणम् *

आक्रान्त इव केनापि रोगानीकैरभिद्रुतः ।
अकस्माद्भवदुद्वेगो रजोनीहारसंवृतः ॥ २३ ॥

विधूम्रैः परुषैर्वातैरकस्माच्च पतद्ध्वजः ।
परस्परभवद्द्रोहो नतथानूर्यनिस्वनः ॥ २४ ॥

उत्प्रेक्षितभयत्रासो निर्घातोल्काभि(दि)दूषितः ।
उद्गमत्प्रज्वलच्छस्त्रो विदक्षिणशिवारुतः ॥ २५ ॥

मण्डलैः काकगृध्राणामाकीर्णो मांसवाशिभिः ।
मुहुरत्युग्रतादीप्तः संसिक्तो रक्तवृष्टिभिः ॥ २६ ॥

DR.RUPNATHJI(DR.RUPAK NATH)

एवं निवेशितस्य स्कन्धावारस्य जयपराजययोः शुभाशुभनिमित्तं जानीयादिति निमित्तज्ञानमुच्यते षोडशभिः श्लोकैः । तत्राशुभनिमित्तान्याह — **आक्रान्त** इत्यादि । केनापि शत्रुविशेषेणावष्टब्ध इव रोगानीकैरभिद्रुतः । अकस्माद् विना प्रियाप्रियैर्दौर्मनस्यहेतुना भवदुद्वेगः ॥ २३ ॥

**विधूम्रैः** धूमिकादिभिः खरैश्च वातैः संवृत इत्येव । अकस्माद् विना वातेन पतद्ध्वजः । परस्परभवद्द्रोहः अवस्कन्दादिभिः । नतथानूर्यनिस्वनः यथा प्राक् ॥ २४ ॥

**भयं** मरणहेतुकं, त्रासः शङ्कामात्रम् । निर्घातोल्कादिदूषणं निर्जनप्रदेशे तस्य निपातनात् । उद्गमत् स्वकोशान्निष्कामत् प्रज्वलत् शस्त्रं यत्र । विदक्षिणशिवारुतः विदक्षिणः प्रतिकूलः ॥ २५ ॥

**अत्युग्रतादीप्तः** अतिरूक्षत्वाद् राक्षसनिवास इव । **रक्तवृष्टिभिः** औत्पातिकीभिः ॥ २६ ॥

१. 'धूम्र' क. पाठः. २. 'ञ्जो' क. घ. पाठः. ३. 'मांसाशी वृक्षवासिनाम्' क. पाठः. ४. 'या' क. ख. ग. घ. पाठः. ५. 'भां' क. ग. घ. पाठः. ६. 'खड्गादि' ग. घ. पाठः.

उत्साहदेशकालैस्तु संयुक्तः सुसहायवान् ।
युधिष्ठिर इवात्यर्थं दण्डेनास्तं नयेदरीन् ॥ ४३ ॥

आत्मनः शक्तिमुद्वीक्ष्य दण्डमप्यधिके नयेत् ।
एकाकी शक्तिसम्पन्नो रामः क्षत्रं पुरावधीत् ॥ ४४ ॥

अलसं विक्रमश्रान्तं विहतोपायचेष्टितम् ।
क्षयव्ययप्रवासैश्च श्रमेणं विप्रविद्धतम् ॥ ४५ ॥

भीरुं मूर्खं स्त्रियं बालं धार्मिकं दुर्जनं पशुम् ।
मैत्रीप्रधानं कल्याणबुद्धिं सान्त्वेन साधयेत् ॥ ४६ ॥

---

अमित्त्राण्यभ्युचितः प्रकारो इत्यादिन्याह — **उत्साहेत्यादि** । उत्साहो विक्रमबलम् । सुसहायवान् सामवायिकाभ्युचितः । युधिष्ठिर इव भ्रातृणां दिव्यास्त्रसंयोगादुत्साहशक्तिं समुद्वीक्ष्य देशकालौ सहायसम्पदश्च महाक्षौहिणीसमवायी विग्रहेण सपत्नानवधीत् ॥ ४३ ॥

सामवायिकाभावेऽप्येकाकी पराक्रमशक्त्याधिक्यमवेक्ष्य विगृह्णीयादित्याह **आत्मन इति** । अधिकेऽपि ज्यायस्यपि । रामः त्रिभुवनामर्षिणो निश्शेषं क्षत्रमवधीत् ॥ ४४ ॥

सामवायिकानां विषयभेदेनैकविंशतिविधानुयोगात् तद्भेदानष्टादशभिः श्लोकैराह — **अलसमित्यादि** । विक्रमेण श्रान्तं विक्रमम् । विहतोपायचेष्टितं निष्फलसामादिप्रयोगम् । क्षयव्ययावुक्तलक्षणौ । विप्रविद्धं विक्षिप्तमन्यम् ॥ ४५ ॥

**मूर्खमशास्त्रचक्षुषम्** । बालमप्राप्तव्यवहारम् । दुर्जनमनुपकारिणम् । पशुं लोकव्यवहारबाह्यम् । मैत्रीप्रधानं सख्यैकनिष्ठम् । कल्याणबुद्धिमविसंवादकम् ॥ ४६ ॥

---

१. 'भ्य' मूलकोशेषु पाठः. २. 'क्षा' क. पाठः. ३ 'मन्तर्भं परिपाडितम्' ख. पाठः.
४. 'णापि प' मूलकोशेषु पाठः. ५. 'नं' क. पाठः. ६. 'विक' क. ख. पाठः.

DR.RUPNATHJI( DR.RUPAK NATH )

के आधार पर ही हम अनुभवों के चित्र मानस-पटल पर खींच सकते हैं। एक प्रकार से देखा जाय, तो प्रत्येक प्राणी में कुछ-न-कुछ स्मरणशक्ति रहती ही है। किन्तु मनुष्य में यह विशेषता है कि उसकी स्मरणशक्ति दूसरे प्राणियों से बढ़ी-चढ़ी और स्पष्ट होती है। इसका मुख्य कारण यह है कि मनुष्य की कल्पनाशक्ति प्रवीण होती है और वह अपनी कल्पना को शब्दों द्वारा स्थिर कर सकता है। मनुष्य में भाषा-ज्ञान प्राप्त करने की शक्ति भी दूसरे प्राणी से अधिक है, जिससे उसका सब प्रकार का ज्ञान बढ़ जाता है। किसी अनुभव को स्मरण करने के लिये हमें तीन बातों की आवश्यकता होती है—(१) अनुभव का मन में स्थिर रहना (Retention), (२) उसका पुनः मानस-पटल पर चित्रित होना (Recall) और (३) उसका अपने पुराने अनुभव के रूप में पहचान में आना (Recognition) अर्थात् धारणा, पुनश्चेतना और पहचान। यहाँ हम स्मृति के इन्हीं तीन अंगों पर संक्षेप में प्रकाश डालने की चेष्टा करेंगे।

**धारणा** (Retention)—अनेक मनोवैज्ञानिकों का कथन है कि मनुष्य की धारणाशक्ति उसके मस्तिष्क की बनावट पर निर्भर है। जिस प्रकार मनुष्यों के मस्तिष्क की बनावट में भेद है, उसी प्रकार उनकी धारणाशक्ति में भी भेद होता है। ये भेद जन्म से ही होते हैं। इस जन्मजात धारणाशक्ति का बढ़ाया जाना सम्भव नहीं। मनुष्यों के मस्तिष्क में ऐसे भेद भी हैं, जिनके कारण वे किसी अनुभव को देर तक स्मरण किये रहते हैं अथवा तुरन्त भूल जाते हैं। कोई-कोई व्यक्ति किसी नई बात को शीघ्र याद कर लेते हैं, किन्तु वे उतनी ही जल्दी भूल भी जाते हैं और कई याद करने में देर लगाते हैं, पर उनका याद किया हुआ विषय उनकी स्मृति में बहुत दिनों तक बना रहता है। किसी भी संस्कार का स्मृति में स्थिर रहना निम्न चार बातों पर निर्भर करता है—(१) समीपता (Recency), (२) सघनता (Frequency), (३) रोचकता (Interest) और (४) सम्बन्ध (Association)।

**पुनश्चेतना** (Recall)—हमारी स्मृति पर जो संस्कार अंकित हो जाते हैं, उनका फिर चैतन्य मन में आना 'पुनश्चेतना' कहलाता है। वास्तव में स्मृति का यही प्रधान अङ्ग है। अतएव इसे 'स्मरण' भी कहा जाता है। संस्कारों के पुनश्चेतन होने की शक्ति धारणाशक्ति ही पर निर्भर है। जिस मनुष्य की धारणाशक्ति जितनी बढ़ी-चढ़ी होती है, उतना ही वह पुरानी बात को स्मरण में ला सकता है। जिस संस्कार को हम एक बार अभ्यास करके, उसे कई दूसरे संस्कारों से सम्बद्ध कर मन में दृढ़ कर लेते हैं, वही हमें शीघ्रता के साथ याद आते हैं। किन्तु मन में स्थित सब संस्कारों का पुनश्चेतन होना न सम्भव है और न आवश्यक ही है। मन की कोई भी शक्ति अभ्यास से बढ़ती और

DR.RUPNATHJI( DR.RUPAK NATH )

घटती है। संस्कारों की पुनश्चेतना उनकी उत्तेजना पर निर्भर है। जो संस्कार जितना ही दूसरे संस्कारों से अधिक सम्बद्ध रहते हैं, वे उतनी ही सरलता से उत्तेजित किये जा सकते हैं। स्मरण करते समय एक अनुभव यदि दूसरे अनुभव से सम्बद्ध होता है, तो वह दूसरे अनुभव की याद अपने आप दिला देता है। इसी तरह यह दूसरा अनुभव तीसरे को ले आता है और यह क्रम आगे चलता जाता है। हमें यहाँ यह ध्यान में रखना चाहिये कि यदि किसी प्रकार इन अनुभवों का आपस में सम्बन्ध टूट जाय, तो फिर एक अनुभव दूसरे को याद नहीं करता। सम्बन्धों को स्थिर रखने में आत्मविश्वास बड़ा काम करता है। स्मरण करने के लिए निर्विघ्नता आवश्यक है। संशय एक प्रकार का विघ्न है। जिस प्रकार संशय हमारी दूसरी शक्तियों को नष्ट कर देता है, उसी प्रकार वह स्मरणशक्ति को भी नष्ट कर देता है।

**पहचान** (Recognition)—यह स्मृति का तीसरा अंग है। इसका आधार भी पुराने संस्कारों का मन में स्थिर रहना है। जो व्यक्ति हमारे दो-तीन बार के देखे हुए रहते हैं, उन्हें हम तुरन्त पहचान लेते हैं। शिक्षक लोग साधारणतया कहा करते हैं कि मुझे पुराने विद्यार्थियों के नाम स्मरण नहीं, पर उन्हें देखने पर पहचान सकते हैं। इससे स्पष्ट है कि हमारी पहचानने की शक्ति स्मरणशक्ति से कितनी अधिक है। जैसे डेढ़ वर्ष के बालक की प्रयोग-शब्दावली (Application vocabulary) बीस शब्दों के लगभग होती है, किन्तु उसकी बोध-शब्दावली (Recognition vocabulary) डेढ़ सौ शब्दों के लगभग होती है। जैसे-जैसे मनुष्य की पहचानने की शक्ति, जो अनुभव पर निर्भर है, बढ़ती जाती है वैसे-वैसे उसकी समझ में विकास होता जाता है। पहचानने की शक्ति और स्मरणशक्ति में पारस्परिक सम्बन्ध निश्चित कर की चेष्टा कई मनोवैज्ञानिकों ने की है। दोनों ही स्मृति के अङ्ग हैं। किन्तु पहचानने में पुराने संस्कारों को उत्तेजित करनेवाला कोई प्रत्यक्ष पदार्थ होता है। स्मरण में इस प्रकार की सुविधा नहीं होती। अतएव किसी वस्तु का पहचानना उसके स्मरण करने की अपेक्षा अधिक सरल है। परन्तु साधारणतया जिस व्यक्ति की जितनी अधिक पहचानने की शक्ति होती है, उतनी ही अधिक उसमें पुराने अनुभवों को पूर्णतया स्मरण करने की भी शक्ति होती है। प्रयोगों द्वारा पता चला है कि किसी भी व्यक्ति को दोनों प्रकार की योग्यताओं में ८ प्र० श० सहयोग-सम्वन्ध (Co-efficient) होता है।

**ध्यान** (Attention)—ज्ञानोत्पादन का सब से महत्त्व का साधन ध्यान है। वास्तव में ध्यान और चेतना का क्षेत्र एक ही है, अतएव चेतना द्वारा

DR.RUPNATHJI(DR.RUPAK NATH)